संस्कृतवार्ताः

दिनाङ्कः : 04.09.25 सायम् - 06:20

**आदौ-मुख्यवार्ताः**

- केन्द्रीय-वित्त-मन्त्री निर्मला सीतारामनः उक्तवती यत् नूतन-जी. एस्. टी.-व्यवस्था नागरिकाणां उपभोगं वर्धयिष्यति, आर्थिकव्ययं न प्रभावयिष्यति।
- केन्द्रिय कृषिमन्त्री शिवराजसिंह् चौहानः अद्य अवदत् यत् सः क्षतिविषये विस्तृतं प्रतिवेदनं प्रधानमन्त्रिणं समर्पयिष्यति।
- मॉरिशस-देशस्य प्रधानमन्त्री नवीनचन्द्र-रामगुलाम्-वर्यः अस्य मासस्य नवतः षोडशदिनाङ्कपर्यन्तं भारतस्य राजकीययात्रां करिष्यति।
- रुस्-देशस्य राष्ट्रपतिः व्लादिमिर् पुतिनः अद्य अवदत् यत् युक्रेन्-देशे नियुक्ताः काश्चन पाश्चात्यसैनिकाः मास्को-देशस्य आक्रमणार्थं वैधानि लक्ष्याणि भविष्यन्ति।
- यू एस् ओपन् टेनिस्-क्रीडायां अमण्डा अनिसिमोवा इत्येषा नाओमी ओसाका इत्येतां पराजित्य आर्यना सबालेन्का इत्यनया सह महिला-एकल क्रीडायाः निर्णायक द्वन्द्वे प्रविष्टवती।

**अथ वार्ताः विस्तरेण**

**सीतारामनः - जी. एस्. टी.**

केन्द्रीय-वित्त-मन्त्री निर्मला सीतारामनः उक्तवती यत् नूतन-जी. एस्. टी.-व्यवस्था नागरिकाणां उपभोगं वर्धयिष्यति, आर्थिकव्ययं न प्रभावयिष्यति इति। एकस्याः वार्तावाहिन्याः साक्षात्कारे श्रीमती सीतारामनः अवोचत् यत्, सर्वेषामपि वस्तूनां करः अधुना शून्यं, पञ्च उत अष्टादश प्रतिशत-कोष्ठकेषु वर्तते। सा अवोचत् यत्, एतत् प्रथमः क्षतिपूर्ति अवसरो विद्यते यतोहि , जी. एस्. टी. इति विषये विस्तृतः प्रस्तावः केन्द्रेण स्वीकृतः अस्ति। मन्त्री अवदत् यत्, पेट्रोलियम-मादक पदार्थाः जी. एस्. टी.-तः बहिः भविष्यन्ति इति। श्रीमती सीतारामनः अवदत् यत्, आत्मनिर्भरभारतस्य उद्देश्यं न केवलं देशे सर्वं उत्पादनम्, अपितु अनिश्चित-वैश्विक-व्यापार-नीतिनाम् सम्मुखे आत्मसम्मानम् अपि वर्तते।

**पञ्जाबराज्यम्**

केन्द्रिय कृषिमन्त्री शिवराजसिंह् चौहानः अद्य अवदत् यत् सः क्षतिविषये विस्तृतं प्रतिवेदनं प्रधानमन्त्रिणं समर्पयिष्यति इति। सोशलमीडिया- सन्देशे, सः अवदत् यत् सङ्कटं अपारम् अस्ति, परञ्च केन्द्रसर्वकारः पञ्जाब्-राज्यं ततः बहिः नेतुं वाञ्छितोपायान् करिष्यति। जलप्लावित-पञ्जाब्-प्रदेशस्य एकदिवसीय यात्रायां गतदिने श्री चौहानः जलप्लावित-क्षेत्राणां पुनर्निर्माणे अल्पकालिक-मध्यम-दीर्घकालीन-योजनानां च विषये अवधानं प्रदत्तवान्।

**प्रधानमन्त्री मॉरिशस**

मॉरिशस-देशस्य प्रधानमन्त्री नवीनचन्द्र-रामगुलाम्-वर्यः अस्य मासस्य नवतः षोडशदिनाङ्कपर्यन्तं भारतस्य राजकीययात्रां करिष्यति। विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः अवदत् यत्, श्रीरामगुलाम्-वर्यस्य भारते एतत्

प्रथमं वैदेशीय-द्विपाक्षिकं भ्रमणम् भविष्यति इति। अस्मिन् यात्रायां दिल्ली-नगरम् अतिरिच्य मॉरिशस -देशस्य प्रधानमन्त्री मुम्बई-नगरं, वाराणसी-नगरं अयोध्यां, तिरुपतिं च गमिष्यति इति सः अवदत्।

**ओणम महोत्सवः**

अद्य सर्वत्र केरलसमुदायेन तिरु ओणम महोत्सवः सोल्लासेन सोत्साहेन आचर्यते। अयं उत्सवः केरलस्य महत्वपूर्णेषु उत्सवेषु भवति। गतदिनेभ्यः राज्यं समग्रं उत्सवभावेन रम्यं जातम्। ओणम धर्मिष्ठस्य महाबलिमहाराजस्य पुनरागमनस्मरणरूपेण आचर्यते, यः न्यायप्रियः दयालुः अतीव प्रियः च आसीत्। समग्रे केरलराज्ये शासकीयसंस्थाः, सांस्कृतिकसङ्घटनानि, स्थानीयसमुदायाः च नानाविधान् सांस्कृतिककार्यक्रमान् आयोजयन्ति। सबरीमाला-गुरुवायूर-त्रिक्कक्करादि प्रमुखमन्दिरेषु अद्य विशेषपूजाः सम्पद्यन्ते।

**प्रेज़्-टीचर्स्-दिवसः-**

राष्ट्रपतिः द्रौपदी मुर्मुः वर्या प्रोक्तवती यत् महिला-नेतृत्वस्य विकासं प्रोत्साहनाय सर्वाधिकः उत्तमः उपायः अस्ति यत् बालिकानां कृते सर्वोत्तमं शिक्षणप्रदानम् इति। अद्य शिक्षकदिवसस्यावसरे नवदेहली-नगरे पञ्चविंशत्यधिक-द्विसहस्रतम-वर्षस्य राष्ट्रिय-शिक्षक-पुरस्कारान् वितरणानन्तरं तत्र उपस्थित-जनसमूहं सम्बोधयन्ती राष्ट्रपतिः उक्तवती यत् बालिकानां शिक्षा सर्वोच्चप्राथमिकतायां भवेत् इति। कन्यानां शिक्षायाम् निवेशः परिवाराणां, समाजस्य, राष्ट्रस्य च विकासाय अमूल्यं योगदानम् अस्ति इति सा अवोचत्।

अद्यत्वेषु वर्षेषु उच्चशिक्षायां बालिकानां समग्र-नामाङ्कन-अनुपातः महत्त्वपूर्णरूपेण वर्धितः इति राष्ट्रपतिः प्रसन्नतां प्रकटितवती। राष्ट्रपतिः अवदत् यत् शिक्षा जनं शक्तं करोति, दुर्बलतम-पृष्ठभूम्याः बालकान् उल्लेखनीयं प्रगतिं प्राप्तुं समर्थयति। राष्ट्रपतिः मुर्मुः प्रोक्तवती यत् विंशत्यधिक द्विसहस्रेत्यस्य राष्ट्रियशिक्षानीतिः विद्यालयीयस्तरे शिक्षां सुलभतरं निर्विघ्नं च निर्मातुं विशेषम् महत्त्वं ददति इति।

**प्रधानमन्त्री – लेखः**

प्रधानमन्त्री नरेन्द्रमोदी अद्य आङ्ग्लदैनिकवार्तापत्रे केन्द्रीयशिक्षामन्त्रिणा धर्मेन्द्रप्रधानेन लिखितः लेखः विनिमयी कृतवान्, विंशत्यधिक द्विसहस्रेत्यस्य राष्ट्रियशिक्षानीतेः महत्त्वस्य विषये लिखिते लेखे श्री प्रधानेन विंशत्यधिक द्विसहस्रेत्यस्य राष्ट्रियशिक्षानीतिः भारतस्य आत्मनिर्भरतायाः विकासस्य च यात्रायाः केन्द्रत्वेन वर्णितम्।

**गोयल्-भाजपः**

भाजपा-दलस्य वरिष्ठः नेता अथ च केन्द्रीय-वाणिज्य-उद्योग-मन्त्री पियूष् गोयलः सद्यः एव कृतान् नेक्स्ट-जनरेशन्-जी. एस्. टी.- परिष्कारान् ऐतिहासिकं, व्यापकं चेति अवोचत्। अद्य अपराह्णे नवदेहली-नगरस्य दल-मुख्यालये वार्ताहरान् सम्बोधयन् श्री गोयलः अवदत् यत्, देशस्य उपभोक्तृभ्यः महती सुलभता प्रदत्ता अस्ति।

**जयशङ्करः – भूटान्**

विदेशमन्त्री डा. एस्. जयशङ्करः अद्य सायङ्काले नवदेहली-नगरे भूटान्-देशस्य प्रधानमन्त्री दाशो शेरिङ्ग् तोब्गे-वर्येण सह मेलनं करिष्यति। भूटान्-देशस्य प्रधानमन्त्री बुधवासरे चतुर्दिवसीय-यात्रायां भारतं आगच्छत्। उत्तरप्रदेशस्य अयोध्यायां कार्यक्रमेषु भाग-ग्रहणानन्तरं सः राष्ट्रियराजधान्यां दिल्ल्याम् आगमिष्यति इति।

**संयुक्तराष्ट्रसङ्घः-**

भारतेन युक्रेन्-देशे प्रवर्तमानस्य संघर्षस्य समाधानार्थं सद्यः एव कृतानां सकारात्मक-घटनाक्रमाणां स्वागतम् अकरोत्। सः द्वन्द्वस्य समाधानार्थं संवादस्य कूटनीतेः च आवश्यकतायां बलम् अददात्, सहैव युद्धस्य अन्य परिणामाः, इन्धनस्य मूल्यम् इत्यादीनां विषये चिन्तां प्रकटयन्, वैश्विक-दक्षिणस्य देशाः स्वस्थित्यां परित्यक्ताः इति उक्तवान्। संयुक्तराष्ट्रसङ्घे भारतस्य स्थायीप्रतिनिधिः पी. हरीशः युक्रेन्-संघर्षस्य विषये संयुक्तराष्ट्रसङ्घस्य सामान्यसभायां चर्चायाः समये भाषमाणः आसीत्।

## जीएसटी

केन्द्रीयप्रशासनेन सद्यः घोषितेषु अनेकेषु विषयेषु वस्तु-सेवा-करस्य न्यूनीकरणेन समाजस्य विभिन्नेषु वर्गेषु सुलभता प्रकल्पिता। स्वातन्त्र्यदिने रक्तदुर्गात् प्रधानमन्त्रिणा नरेन्द्रमोदिना सामान्यजनानां कृते जी. एस्. टी. इत्यस्मिन् परिष्कारा: घोषिता:। संशोधनोऽयम् मासस्यास्य द्वाविंशतिः दिनाङ्कात् प्रवर्तिष्यते। प्रधानमन्त्रिण: अधिक-दक्ष-नागरिक-अनुकूल-अर्थव्यवस्थायाः निर्माणस्य लक्ष्यं परिपूर्णम् अभवत्, यतः अस्मिन् मासे तृतीयदिनाङ्के जी. एस्. टी.-परिषदा कर-युक्तिकरणम् अनुमोदितम्। एतै: परिष्कारै: अनेकेषु क्षेत्रेषु करस्य मूल्यं न्यूनीकृतम्, येन नागरिकाणां जीवनं सुलभं जातम्। आकाशवाण्या: वार्ताहरै: सह संवादे दिल्लया: निवासी लक्ष्मीनारायण: उक्तवान् यत् इदानीं छात्रा: लाभान्विताः भविष्यन्ति।

## रुस्-देशस्य राष्ट्रपतिः

रुस्-देशस्य राष्ट्रपतिः व्लादिमिर् पुतिन: अद्य अवदत् यत् युक्रेन्-देशे नियुक्ताः काश्चन पाश्चात्यसैनिकाः मास्को-देशस्य आक्रमणार्थं वैधानि लक्ष्यानि भविष्यन्ति इति। श्री. पुटिन् व्लाडिवोस्टोक्-नगरे आर्थिक-मञ्चे भाषणं कुर्वन् आसीत्, एकदिवसस्य अनन्तरं फ्रान्स्-देशस्य राष्ट्रपतिः इम्मानुयेल् म्याक्रोन् अवदत् यत् षड्विंशतिः देशाः युक्रेन्-देशस्य युद्धोत्तर-सुरक्षायाः प्रत्याभूतिं दातुं प्रतिज्ञां कृतवन्त:।

## ऋतु विभाग:

भारत ऋतु विभागेन अद्य गुजराते प्रचण्डवृष्ट्यै रक्तवर्णीया सञ्चेतना प्रसारितास्ति। ऋतुविभागेन अद्य राजस्थान-कोङ्कन-गोवा-मध्यमहाराष्ट्र-सौराष्ट्र-कच्छ-मध्यप्रदेशेषु अति-वृष्टेः पूर्वानुमानं प्रकटितम्। दिल्ली-एनसीआर-क्षेत्रे दिवा प्रचण्डवृष्टेः सम्भावनास्ति।

## बिहार-एशिया-कप्-हाकी-

बिहारस्य राजगीर-नगरे प्रचलिते पुरुष-एशिया-कप्-हाकी-चैम्पियन्शिप-क्रीडायां भारतीयदलं श्वः सूपर्-फोर्-स्टेज्-क्रीडायां चीन-दलं सम्मुखी करिष्यति। क्रीडा श्वः सायं सार्ध सप्तवादने राजगीर्-अन्ताराष्ट्रिय-क्रीडाङ्गणे भविष्यति।

## यू एस् ओपन् टेनिस्-

यू एस् ओपन् टेनिस्-क्रीडायां अमण्डा अनिसिमोवा इत्येषा नाओमी ओसाका इत्येतां पराजित्य आर्यना सबालेन्का इत्यनया सह महिला-एकल क्रीडायाः निर्णायक द्वन्द्वे प्रविष्टवती।

।। इति वार्ता:।।